**अजातदन्त** त्रि० न जातो दन्तोऽस्य, यस्मिन् वयसि वा। दन्तजननशून्ये, अवस्थाभेदे च। "अजातदन्ता ये केचिद् ये च गर्भे प्रपीड़िता" इति वायुपुरा०। "अजातदन्तमरणे पित्रोरेकाहमिष्यते" इति शु० कूर्म्मपुरा०। तत्कालश्च न्तृणां षण्मासाभ्यन्तरमिति शुद्धितत्त्वे सपञ्चं निरूपितम्। पश्वादीनान्तु प्रधानदन्तोत्पत्त्यभावे एवाजातदन्तत्वव्यवहारः (आदाँता) इत्यादि लोके प्रसिद्धिः। स च प्रायेण द्विवर्षो-त्तरकालपर्य्यन्तः।

**अजातपक्ष** त्रि० न जातौ उड्डयनसामर्थ्ययुक्तौ पक्षावस्य। अनुद्भिन्नपक्षके पक्षिणि। "अजातपक्षाः शकुना इवाबभु-रिदि भार०।

**अजातशत्रु** पु० जातस्य जन्तुमात्रस्य न शत्रुः अश्राद्धभोजी-त्यादिवत् नञो व्यवहितेन शत्रुशब्देनान्वयात् असमर्थ-समासः, न जातः शत्रुरस्य वा। युधिष्ठिरे राजनि। "न द्वेष्टि यज्जनमतस्त्वमजातशत्रुः, इति" वेणी०। एवमजा-तारिरपि तत्रैव। "हन्त जातमजातारेः प्रथमेन त्वयारिणे-ति" माघः। [शून्ये, न्यायोक्त-जात्यादौ, नित्ये च त्रि०।

**अजाति** स्त्री जन-क्तिन् न०त०। अनुत्पत्तौ। ब०। जाति-

**अजादनी** स्त्री अजैस्तृण्याद्यतेऽसौ अन्येन दुःखस्पर्शत्वेऽपि अजै-राद्यते इति अद-कर्म्मणि ल्युट् ६त०। दुरा-लभा इति (विचिति) इति च प्रसिद्धे स्पर्शेन दुःखदायके वृक्षभेदे।

**अजादि** पु० ६त०। ङीब्बाधकटाब्निमित्ते पाणिन्युक्ते शब्दसमूहे स च गणः। एडका, कोकिला, चटका, अश्वा मूषिका, बाला, होड़ा, वत्सा, पाका, मन्दा विलाता, पूर्व्वापहाणा, अपरापहाणा (सम्भस्त्राजि-नशणपिण्डेभ्यः फलात्)। (सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात्)। (मूलान्नञः) (शूद्रा चामहत्-पूर्व्वा जातिः) ज्येष्ठा कनिष्ठा मध्यमा (पुंयोगेऽपि) क्रुञ्चा उष्णिहा देवविशा दंष्ट्रा। [जायारहिते।

**अजानि** पु० नास्ति जाया यस्य ब० जायाया निङादेशः।

**अजानिक** त्रि० अजेन तद्विक्रयपालनादिना आनो जीवनम् अस्त्यस्य ठन्। अजाजीविनि। तस्य कर्म्म भावो वा पुरोहिता० यक्। आजानिक्यम् तत्कर्म्मणि तद्भावे च न०।

**अजानेय** पु० अजेऽपि विक्षेपेऽपि आनेयो यथास्थानं प्राप-णीय आरोही येन अज-विक्षेपे अप् वीभावाभावः आ+नी-कर्म्मणि यत् ततः ३ब०। बहुशस्त्रप्रहारप्रतिरोधेऽपि निर्भयेन यथास्थानमारोहिणः प्रापके अश्वे, उत्तमाश्वे च निर्भये त्रि०।

**अजान्त्री** स्त्री अजस्यान्त्रमिव अन्त्रं तदाकारवती मञ्जरी अस्याः गौ० ङीष्। नीलवुह्नायाम् (नीलवोना)।

**अजापक्क** न० "छागशकृद्रसमूत्रक्षीरैर्दध्ना च साधितं सर्पिः। सक्षारं यक्ष्महरं काशश्वासोपशान्तये परममिति" चक्र-दत्तोक्ते घृतभेदे न०। [उप०। अजपालके, तेनाजीवके च।

**अजापालक** त्रि० अजान् आपालयति आ+पा-णिच् ण्वुल्

**अजि** त्रि० अजति अज-इन् व्यभावः। गतिशीले। पदाजिः। भावे इन्। गतौ, क्षेपे च स्त्रियां वा ङीप्।

**अजित** त्रि० न०त०। जितभिन्ने पराजितभिन्ने। जिधातो-र्द्विकर्म्मकत्वात् अनिर्जितशत्रौ, अपराजितदेशादौ चास्य प्रवृत्तिः एकस्य कर्म्मणोऽविवक्षायामन्यस्य विवक्षायां तत्रैव कर्म्मणि क्तः। भूरिप्रयोगस्तु अनिर्ज्जितशत्रावेव तथा च "गौणे कर्म्मणि दुह्यादे"रित्युक्तेः गौणकर्म्मण्एवाभि-धाननियमात् तस्यैव जयकर्म्मतायां क्तेनाभिधातुं योग्य-त्वम्। "न च तेऽस्त्यजितं किञ्चिदिति पुरा०, नास्त्येषा-मजितो देश" इत्यादौ गौणकर्म्मणोऽविवक्षयैव जयप्राप्त देशादौ जितशब्दप्रयोगात् ततोऽगत्समास इति भेदः। रागादिभिर्जितत्वाभावात् शिवे, विष्णौ, बुद्धे, च पु०।

**अजिन** न० अजति क्षिपति रजआदि, आवरणेन अज-इनच् न व्यादेशः। चर्म्मणि, चर्म्मावृतत्वादेव रजआदीनां न देहप्रवेश इत्यतश्चर्म्मणोरजोविक्षेपसाधनत्वात्तथात्वम्। "चे-लाजिनकुशोत्तरमिति" स्मृतिः। "ऐणेनाजिनेन ब्राह्मण-मिति" गृह्यम्। "गजाजिनं शोणितविन्दुवर्षि चेति" "अथाजिनाषाढ़धर इति" च कुमा०। अदूरभवाद्यर्थे कृशा० छण्। आजिनीयः तददूरभवादौ त्रि०।

**अजिनपत्रा(त्री)** (त्रिका) स्त्री अजिनं चर्मेव सुश्लिष्टं पत्रं पक्षो यस्याः ब०। (चामचिका) इति प्रसिद्धे पक्षिभेदे गौ० ङीष् (त्री) तत्रार्थे। ततः स्वार्थे के ह्रस्वे टापि-पत्रिकापि तत्रार्थे।

**अजिनफला** स्त्री अजिनं चर्मविकारत्वात् भस्त्रा इव फलं यस्याः अजिनपूर्व्वकत्वेन जातिलक्षणं ङीषं बाधित्वा अजा० टाप्। (टेपारी) इति प्रसिद्धे, भस्त्राकारफले वृक्षभेदे।

**अजिर** न० अज-किरन् वीभावाभावः। (उठान) इति ख्याते चत्वरे। शीघ्रगन्तरि त्रि०। "श्येना अजिरा इति" ता० ब्रा० "अजिराः क्षिप्रगमनशीला इति" भाष्यम् अत एव क्षिप्रनाम्नि निरुक्ते अजिरमिति पठितम् शीघ्रवेगव-